# Shri Bhavani Shankara AshtavadhanashlokAH

# શ્રીભવાનીશઙ્કરાષ્ટાવધાનશ્લોકાઃ

## Document Information

Text title : Bhavani Shankara Ashtavadhanashlokah

File name : bhavAnIshankarAShTAvadhAnashlokAH.itx

Category : shiva

Location : doc_shiva

Transliterated by : Rajesh Thyagarajan

Proofread by : Rajesh Thyagarajan, NA

Source : Shri Chitrapura Stuti Manjari, 2019

Acknowledge-Permission: Shri Chitrapur Math - Publications Committee https://chitrapurmath.net/

Latest update : June 5, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2021

*sanskritdocuments.org*

# શ્રીભવાનીશઙ્કરાષ્ટાવધાનશ્લોકાઃ

વિપ્રાણામુપકારકાન્ શુભકરાન્ ઋગ્વેદમન્ત્રાનિમાન્
નાનાર્થાભિહિતાંસ્ત્વયા પ્રકટિતાન્ ભક્ત્યા મયા ભાષિતાન્ ।
સ્વર્ગાધિષ્ઠિતવાસવાદિવિબુધૈઃ સમ્પૂજિતાઙ્ઘ્રિદ્વય
ભક્તાનામભયપ્રદાયક શિવ ત્વં શઙ્કરાકર્ણય ॥

દેવ દેવોત્તમ દેવતાસાર્વભૌમ અખિલાણ્ડકોટિબ્રહ્માણ્ડનાયક
"ઋગ્વેદપ્રિય ઋગ્વેદ"સેવામવધારય ॥ ૧॥

દિવ્યં સુસ્વર શોભનાર્થકમિમં ભક્ત્યા મયા ભાષિતં
યજ્ઞાનામુપયોગિનં શૃણુ યજુર્વેદં તવાહ્લાદકમ્ ।
સ્વાહાકારયુજં સુરાદિસુખદં દક્ષાધ્વરધ્વંસક
સાધૂનાં ભવભીતિનાશનકર શ્રીમદ્ભવાનીપતે ॥

દેવ દેવોત્તમ દેવતાસાર્વભૌમ અખિલાણ્ડકોટિબ્રહ્માણ્ડનાયક
"યજુર્વેદપ્રિય યજુર્વેદ"સેવામવધારય ॥ ૨॥

વેદાનાં પરમં મયા નિગદિતં કર્ણામૃતં તોષદં
દુષ્ટાનાં ક્રથને વિશારદ ચિરં ત્રૈલોક્યનાથાગ્રણીઃ ।
ભક્તાનાં પરિપાલનોત્સુકતમ પ્યાટ્ સામગાનપ્રિય
હેમાદ્રિસ્થિતયોગિવન્દિતપદ ત્વં સામગાનં શૃણુ ॥

દેવ દેવોત્તમ દેવતાસાર્વભૌમ અખિલાણ્ડકોટિબ્રહ્માણ્ડનાયક
"સામવેદપ્રિય સામવેદ"સેવામવધારય ॥ ૩॥

નાનાર્થાભિહિતાંસ્ત્વયા પ્રકટિતાંશ્ચાથર્વવેદોદયાન્
મન્ત્રાન્વીર્યયુતાનભીષ્ટફલદાન્ લોકે ત્વયા વિસ્તૃતાન્ ।
કૈલાસસ્થિતનન્દિમુખ્યગણપૈઃ સ્તોત્રૈઃ સદા વન્દિત
લોકાભીષ્ટફલપ્રદાતૃ ગિરિશ ત્વં કૃત્તિવાસઃ શૃણુ ॥

દેવ દેવોત્તમ દેવતાસાર્વભૌમ અખિલાણ્ડકોટિબ્રહ્માણ્ડનાયક

“અથર્વવેદપ્રિય અથર્વવેદ”સેવામવધારય ॥ ૪॥

ષટ્ત્રિંશાત્મકતત્ત્વસાધનકરં વેદાન્તવેદ્યાવ્યય
    વિશ્વોત્પાદક વિશ્વતોમુખમિદં ત્વલ્પાક્ષરં સારવત્ ।
અસ્તોભં ત્વનવદ્યસૂત્રમમલં સર્વાર્થસમ્પાદકં
    શશ્વત્સંશ્રુતિસાગરં સમુદિતં વેદાન્તશાસ્ત્રં શ઼ૃણુ ॥

દેવ દેવોત્તમ દેવતાસાર્વભૌમ અખિલાણ્ડકોટિબ્રહ્માણ્ડનાયક
“વેદાન્તશાસ્ત્રપ્રિય વેદાન્તશાસ્ત્ર”સેવામવધારય ॥ ૫॥

ભસ્મોદ્ધૂલિતવિગ્રહોપનિષદાં વાક્યૈરુપબૃંહિતં
    પારાશર્યકૃતં પુરાણમુદિતં નિત્યં મયા ભક્તિતઃ ।
એતત્પઞ્ચસુલક્ષણાન્વિતપદં હ્યધ્યાત્મતત્ત્વં પરં
    શશ્વત્સંશ્રુતિસાગરોદ્ધર વિભો ત્વં સેતિહાસં શ઼ૃણુ ॥

દેવ દેવોત્તમ દેવતાસાર્વભૌમ અખિલાણ્ડકોટિબ્રહ્માણ્ડનાયક
“પુરાણપ્રિય પુરાણ”સેવામવધારય ॥ ૬॥

વિશ્વાધારક વિશ્વપોષક ભવન્ વિશ્વાદ્ય વિશ્વેશ્વર
    વિશ્વેષાં સ્થિતિસૃષ્ટિનાશનવિધે વિશ્વાત્મકાધીશ્વર ।
વિદ્યાધારક વિશ્વરૂપક ગુરો વિદ્યાપ્રદાતઃ પ્રભો
    વિદ્વદ્ભિર્નુત વન્દ્યમાનચરણ ત્વં ગદ્યમાકર્ણય ॥

દેવ દેવોત્તમ દેવતાસાર્વભૌમ અખિલાણ્ડકોટિબ્રહ્માણ્ડનાયક
“ગદ્યપદ્યપ્રિય ગદ્યપદ્ય”સેવામવધારય ॥ ૭॥

માતાઙ્ગાસુરકન્ધરાપહર ભો મારાઙ્ગસન્દાહક
    માયા પારગ માન્ય માધવસુહૃન્ માયાગુણૈર્મોહક ।
માયાતીત નિરઞ્જનાત્મક સદા માહેન્દ્રવન્દ્યાદ્ય ભો
    માર્કણ્ડેયમુનીન્દ્રપૂજિતપદ સોમાષ્ટકં ત્વં શ઼ૃણુ ॥

દેવ દેવોત્તમ દેવતાસાર્વભૌમ અખિલાણ્ડકોટિબ્રહ્માણ્ડનાયક
“અષ્ટકપ્રિય અષ્ટક”સેવામવધારય ॥ ૮॥

શ્રુત્યાદિસ્તુતિભિઃ પ્રકાશિત જટિન્ વિધ્વગ્નિસૂર્યામ્બક
    નાનાલઙ્કૃતભોઽન્ધકાસુરરિપો વિદ્યાધરાખ્યાપિતમ્ ।
ભો સ્વામિંસ્તવમાનસપ્રિયમિદં ષડ્જાદિભેદાન્વિતં
    શ્રીરાગાદિયુતં શુભં સુરુચિરં સઙ્ગીતમાકર્ણય ॥

દેવ દેવોત્તમ દેવતાસાર્વભૌમ અખિલાણ્ડકોટિબ્રહ્માણ્ડનાયક
“સઙ્ગીતપ્રિય સઙ્ગીત”સેવામવધારય ॥ ૯॥

દૈત્યોન્મન્થવિધૌ પરાક્રમનિધે હે શીર્ષમાલાધર
સાધૂનાં હૃદયામ્બુજસ્થ સતતં રુદ્રાક્ષમાલાધર ।
રક્ષોહૃદ્ભયકારકં શુભકરં દુગ્ધાચ્છશઙ્ખોત્થિતં
ૐકારધ્વનિમીશ કર્ણમધુરં શમ્ભો સદાકર્ણય ॥

દેવ દેવોત્તમ દેવતાસાર્વભૌમ અખિલાણ્ડકોટિબ્રહ્માણ્ડનાયક
“શઙ્ખવાદ્યપ્રિય શઙ્ખવાદ્ય”સેવામવધારય ॥ ૧૦॥

શ્રીમચ્છઙ્કરદેશિકાદિગુરુભિઃ સ્વારાધિતાનન્દદ
શ્રીમદ્ભક્તજનોત્તમૈઃ કૃતમિદં નાદેન સંશોભિતમ્ ।
સમ્રધ્વાનયુતં શુભં સુરુચિરં શ્રીમન્ મૃડાનીપતે
શ ૃઙ્ગાલઙ્કૃતરાગનાદસહિતં વેણું સદા ત્વં શ ૃણુ ॥

દેવ દેવોત્તમ દેવતાસાર્વભૌમ અખિલાણ્ડકોટિબ્રહ્માણ્ડનાયક
“વેણુવાદ્યપ્રિય વેણુવાદ્ય”સેવામવધારય ॥ ૧૧॥

ત્રિપુરદહનમૂર્તે પાવનાપારકીર્તે
ત્રિભુવનધરમૂર્તે શૂલપાણે ત્રિમૂર્તે ।
ડમરુકધરમૂર્તે વિશ્વમૂર્તેઽષ્ટમૂર્તે
ભવભયહરમૂર્તે મૌરિવાદ્યં શ્રુણુ ત્વમ્ ॥

દેવ દેવોત્તમ દેવતાસાર્વભૌમ અખિલાણ્ડકોટિબ્રહ્માણ્ડનાયક
“મૌરિવાદ્યપ્રિય મૌરિવાદ્ય”સેવામવધારય ॥ ૧૨॥

ભેરિદુન્દુભિઝર્ઝરોર્ધ્વકતુરીશઙ્ખાનકાઙ્કીતત
ઢક્કામર્દલતાલવેણુડમરુશ્રુત્યાદિવાદ્યારવાન્ ।
નાનાભેદયુતાન્ જડીકૃતકકુભ્ઘોષાશ્રવો રન્ધ્રકાન્
શ્રીવલ્યાખ્યપુરાધિવાસ ભગવન્ શ્રીશઙ્કરાકર્ણય ॥

દેવ દેવોત્તમ દેવતાસાર્વભૌમ અખિલાણ્ડકોટિબ્રહ્માણ્ડનાયક
“સર્વવાદ્યપ્રિય સર્વવાદ્ય”સેવામવધારય ॥ ૧૩॥

ઇતિ વત્સગોત્રોત્પન્નગણપતિશર્મણા વિરચિતાઃ
શ્રીભવાનીશઙ્કરાષ્ટાવધાનશ્લોકાઃ સમ્પૂર્ણાઃ ।

Encoded and proofread by Rajesh Thyagarajan

*Shri Bhavani Shankara AshtavadhanashlokAH*

pdf was typeset on June 5, 2021

Please send corrections to *sanskrit@cheerful.com*